## ঝলাং জশোঽন্তে (৮/২/৩৯)

পদত্রয়াত্মকং সূত্রমিদং যথা ঝলাম্ জশঃ অন্তে ইতি। পদস্য পূর্বত্রাসিদ্ধম্ চেতি সূত্রয়োঃ অধিকারে ইদং পঠ্যতে। অতঃ সম্পূর্ণ সূত্রস্যাকারঃ পদস্য অন্তে ঝলাম্ জশঃ ইতি। দীক্ষিতেনাপি উক্তম্ –

**পদান্তে ঝলাং জশঃ স্যুঃ** ইতি।

ঝল্ ইতি প্রত্যাহারঃ, তত্র বর্গাণাং প্রথমঃ দ্বিতীয়ঃ তৃতীয়ঃ চতুর্থশ্চেতি বর্ণাঃ শ্ ষ্ স্ হ্ চেতি বিদ্যন্তে। জশ্ ইত্যপি একঃ প্রত্যাহারঃ তত্র বর্গাণাং তৃতীয়বর্ণাঃ বিদ্যন্তে। অনেন সূত্রেণ পদান্তে বিদ্যমানস্য ঝল্-বর্ণানাং স্থানে অন্তরতমানাং জশ্-বর্ণানাম্ আদেশঃ ভবতি। যস্য উচ্চারণস্থানম্ আভ্যন্তরপ্রযত্নশ্চ সমানঃ এব বর্ণঃ সঃ অন্তরতমঃ ইতি কথ্যতে।

উদাহরণম্ – বাক্ – বাগ্। লিট্ – লিড্। তত্ – তদ্। ত্রিষ্টুপ্ – ত্রিষ্টুব্ চেতি।

চবর্গীযবর্ণস্য স্থানে অনেন প্রাপ্তং জশত্বং **চোঃ কুঃ** ইত্যনেন নিষিদ্ধতে। অপিতু শকারস্য স্থানে প্রাপ্তস্য জশত্বস্য **ব্রশ্চভ্রস্জ**..... ইত্যনেন ষকারাদেশে নিষিদ্ধতে। তদ্বত্ সকারস্য স্থানে প্রাপ্তং দকারং ন ভবতি **সসজুষো রু** ইত্যাদিনা কার্যান্তরাদ্ ইতি। হকারস্য স্থানে গকারঃ অপি অনেন ন ভবতি যতঃ হি **হো ঢঃ** ইত্যনেন হস্থানে ঢকারাদেশঃ ভবতি।